Shri Raghunath Temple MSS. Library,
JAMMU

No. १३५३

Title नव्य मतम्

Author ×

Extent ८ Age ×

Subject न्याय शास्त्र

नक्षमतम्

१३ पत्र

ववद्संयुक्तत्वावच्छिन्नप्रकारताकपक्षधर्मिकनिश्चयत्वेनैवधूमालोकादिपरामर्शानांकारणत्वादिसं
भवात्॥ अनन्यमते तु धूमव्यापकवह्निसमानाधिकरणीभूतत्वानित्यादिज्ञानवारणायधूमव्यापकवह्नि
समानाधिकरणधूमत्वावच्छिन्नप्रकारताकतादृशनिर्णयत्वादिविशेषणेकतथात्वस्यवक्तव्यतया
महागौरवात्। अथधूमालोकादिपरामर्शानामेकरूपेणकारणत्वेधूमालोकादिसंशयभेदानामेकत्रै
वनिवेश्यतयाविशेषणविशेष्यभावभेदेनमहागौरवपर्वतोवह्निव्याप्यधूमवांस्तादृशालोकवान्
वाइतिज्ञानादनुमित्यनुपपत्तिश्च: नचसंशयभेदोननिवेश्यतेकिंतुव्याप्यत्वावच्छिन्नप्रकारतायामेक
एवत्वावच्छेदकावच्छिन्नत्वस्वनिरूपकज्ञाननिरूपितत्वोभयसंबंधावच्छिन्नप्रतियोगिताकःपक्षविशे
षणतापत्राभावविशेष्यतानिरूपितप्रतियोगिप्रकारताभावइतिनोक्तगौरवंनवादर्शितज्ञानादनु।मि
त्यनुपपत्तिः। धूमप्रकारतायामेवतादृशाभावसत्वेनतस्यकारणत्वात्पापादिनिवाच्यं।तथापिपर्वतो

नव्य. २

वतोवह्निव्याप्यधूमवाननीलधूमवान्वेतितानादनुमित्यनुपपत्तेः स्वावच्छेदकावच्छिन्नत्वस्यलेखावच्छेदक
ताव्यापकावच्छेदकताकत्वोक्तावपिपक्षजातिविशेषवत्वादिनाधूमत्वमेवाभावप्रतियोगिविशेषणंतादृ
शांशिकनिर्णयादनुमित्यनुपपत्तेः निर्णयेसंशयेवाव्यावृत्तप्रकारतायांमानाभावेनउक्ताभाववद्व्याप्य
प्रकारताप्रसिद्धेश्चेतिचेत्स्वनिष्ठप्रतियोगितावच्छेदकताकभेदवत्वस्वनिष्ठधर्म्मितावच्छेदकतानि
रूपकविशेषणतापन्नव्याप्यतावच्छिन्नप्रकारतानिरूपितपक्षविशेष्यताशालित्वोभयसंबंधेनप्रकार
विशिष्टज्ञानत्वस्यैवकारणतानवच्छेदकत्वात्प्रतियोगितावच्छेदकता। स्वनिष्ठावच्छेदकतानिरूप
काभाववन्निष्ठप्रकारतानिरूपितपक्षविशेष्यताशालित्वसंबंधावच्छिन्नायास्याभवतिवालोकादि
संशयात्मकोधूमवन्नानिश्चयोधूमत्वरूपप्रकारविशिष्टतच्चदशितिविशेष्यताशालित्वंसंबंधेनधू
मत्ववतोभेदस्यउक्तविशेष्यताकत्वस्यचसत्वात्प्रतियोगितावच्छेदकताघटकसंबंधातणातस्वनि श्री. २

ष्टावच्छेदकतायांस्वनिरूपकावच्छेदकतानिरूपकत्वसंवंधेनव्याप्यत्वनिष्ठावच्छेदकतान्यावच्छेदकता
वत्त्वभिन्नत्वेनिरवच्छिन्नत्वंवदेयंतेननीलधूमवान्नवेतिसंशयात्मनोजातिविशेषवत्त्वान्नवेतिसंशयात्म
नश्चवह्निव्याप्यधूमवानितिनिश्चयस्यनासंग्रहः।धूमत्वनिष्ठावच्छेदकतायाः प्रथमप्रदर्शितसंवंधेतन्नी
लत्वनिष्ठावच्छेदकतावत्त्वात्। द्वितीयेजातिविशेषावच्छिन्नत्वात्वह्निव्याप्यधूमवान्नवेतिसंशयेपि
धूमत्वनिष्ठावच्छेदकतायाःव्याप्यत्वनिष्ठावच्छेदकतावत्त्वादन्यात्वोपादाने वह्निव्याप्यनीलधूमवान्न
वावह्निव्याप्यजातिविशेषवत्त्वान्नवेतिसंशयवारणायवस्वनिष्ठधर्मितावच्छेदकतायामाधेयत्वविशे
षणद्वयमुपादेयं॥नीलधूमत्वाद्यवच्छिन्नलिंगकपरामर्शानांत्मच पृथगेवकारणत्वंवाच्यं।त
थापिशुद्धधूमत्वालोकत्वादिरूपलिंगतावच्छेदकभेदनकारणताभेदाभावाल्लाघवस्याव्याहतत्वा
त्।अथसमुच्चयसंग्रहार्थमभावप्रकारतायांविरोधावच्छिन्नसंसर्गतानिरूपकत्वस्यनिष्ठावच्छेद
कतानिरूपकनिरूपकानुयोगितासंवंधावच्छिन्नावच्छेदकतानिरूपकत्वाभमसंवंधेनस्ववि

शिष्टायाएवप्रकारतायाग्राह्यत्वात्॥ यद्विचभावकोटावेवविशेषमात्रं व्यसंशयःक्वचिज्ज्ञायनतदास्वा
वच्छिन्नाभावविरोधावच्छिन्नसंसर्गतानिरूपकत्वस्यावच्छिन्नत्वोभयसंबंधेनस्वविशिष्टायाप्राकारता
तन्निरूपितपक्षविशेष्यताशालित्वसंबंधावच्छिन्नत्वनिष्ठप्रतियोगितावच्छेदकताकभेदोवैशि
ष्ट्यघटकसंबंधोवाच्यःवस्तुतस्तुसर्वत्रसंशयेविरोधाभावस्याप्रामाणिकतयासमुच्चयवैल
क्षण्यापसंशयेएकैवविशेष्यताकोटिद्वयप्रकारतानिरूपितोपपद्यतेतथाचप्रकारताद्वयानिरूपितव्या
प्यप्रकारतानिरूपितपक्षविशेष्यतावत्ज्ञानत्वेनकारणत्वंवाच्यम्॥ एवंव्याप्यांशेनिर्दुष्टतावच्छे
दकात्पिज्ञानादनुमितिरुपपद्यते। नचैतादृशज्ञानस्यानुमितिहेतुत्वेव्यभिचारस्यहेत्वाभासत्वा
नुपपत्तिःव्यभिचारज्ञानेसत्यपीदृशज्ञानसंभवेनानुमितेरप्रतिबंधादनुमितिजनकपक्षेकिंचित्ज्ञा
नविरोधिज्ञानविषयत्वेनैवहेत्वाभासत्वस्वीकारेसमूहालंबनज्ञानमादायातिप्रसंगइतिवाच्यम्।
कथायांपरोपन्यस्तहेतौव्यभिचाराज्ञानेनकृतेःप्रामाण्यशंकानास्कंदितपरामर्शानुपप

त्वात्तस्य हेत्वाभासत्वोपपादनात् सधर्म्मितावच्छेदकज्ञानविरोधितामादायैव नक्षत्रलक्षणसत्वाच्च त
द्वोक्तापि विशेष्यतासंशयसाधारणी तन्नियामकसामग्र्याः संशयपूर्वक्षणे सत्वादिति वाच्यं संशयसा
मग्र्या एव तादृशविशेष्यताकबुद्धिप्रतिबंधकत्वोपगमात्॥ न चैतत्कल्पनागौरवमाशंक्यं। परामर्शस्यानु
मितिकारणतायां व्याप्याभाववद्विशिष्टबुद्धिप्रतिबंधकतायां विरोधिसमाग्र्या विषयभेदभिन्नानन्त
ग्रामाक्षरप्रतिबंधकतायां चावच्छेदकलाघवेन बहुतरकार्य्यकारणभावाकल्पनेन न च तादृशप्र
तिबंधकत्वकल्पनायां गौरवं॥ प्रकारताद्वयानिरूपितत्वं च स्वनिष्ठप्रकारतानिरूपितत्वस्वभिन्न
निष्ठप्रकारतानिरूपितत्वोभयसंबंधेन प्रकारवत्तो। न्यूनत्वं अतो हि तत्स्याद्दुर्वचत्वेपि न क्षतिः।
अथवा विशेष्यतानवच्छिन्नत्वमेव विशेष्यतायां निवेश्यं समुच्चयवैलक्षण्याय संशये विशेष्यत
योरवच्छेद्यावच्छेदकभावस्यैवोपगमात्॥ एतेन पर्वतत्वावच्छेदेन व्याप्यं नीलपर्वतत्वविशिष्टे च तद

नव्य०
५
७

भावमवगाहमाने संशये विशेष्यतैक्यासंभवात्तावच्छेदकभेदात्तनीलपर्वतो वह्निव्याप्यवान्नवेत्याकारयातात्त्वेतिपरणं ऐक्यासंभवेपि अवच्छेद्यावच्छेदकभावे बाधकाभावात्। यदि भ्रमकारणैव संशये कोटिताख्याविलक्षणानुमन्यते तदा कोटितान्यन्त्वे व्याप्यमाकारतायां विशेषणं स्वमिति दिक्। अथानुगतरूपेण धूमालोकादिपरामर्शानां कारणत्वं धूमाभाववति धूमप्रकारकत्वादिरूपमितिरिचलाप्रामाण्यग्रहाभावानामेकत्र निवेशना यथा धूमाभा धूमप्रकात्वादिरूपनिखिलाप्रामाण्यग्रहाभावानामेकत्र धूमाभाववति धूमप्रकारकत्वरूपाप्रामाण्यग्रहासत्वे धूमपरामर्शादिवालोकपरामर्शादेरपि अनुमितिर्न स्यात्। न च तल्लिंगकानुमितौ तल्लिंगकपरामर्शीयाप्रामाण्यग्रहाभावस्य पृथगेव कारणत्वोपगमात् नैष दोष इति वाच्यं। धूमाभाववत्तात्यादिग्रहदशायां धूमपरामर्शादनुमितिप्रसंगात्. न हि तदभावे विना व्याप्यवत्तापरामर्शस्यानुमितिजनकत्वं नास्ति धूमपरा

श्री०
५

मर्शोऽस्य तन्नास्तीति चेत् किन्तेन धूमपरामर्शत्वेन जनकतायास्त्वयानुपगमात्॥ अत्र केचित् अप्रा
माण्यग्रहाभावोऽत्र कारणं न वा परामर्शनिष्ठकारणतावच्छेदकः किंतु स्वप्रकारतावद्धर्मावच्छिन्नस्वसं
बंधावच्छिन्नप्रतियोगिताकज्ञानाभाव एव व्याप्यप्रकाराताविशेषणीभूपकारणतावच्छेदकः प्रकार
तावत्त्वे च स्वनिरूपिताधेयतासंबंधावच्छिन्नावच्छेदकतावच्छेदकत्वस्वनिरूपितनिरूपितत्वनि
ष्ठावच्छेदकतानिरूपितविशेष्यताविष्ठावच्छेदकतानिरूपिताधिकरणनिष्ठावच्छेदकतानिरूपिता
भावृतिष्ठावच्छेदकतानिरूपितप्रतियोगितासंबंधावच्छिन्नावच्छेदकतावच्छेदकत्वोभयसंबंधेन यस्यं:
अस्ति चेदं ज्ञानं धूमाभाववद्विशेष्यतानिरूपितधूमप्रकारताशालीति ज्ञानस्य त्वाया प्रकारता
तस्याः संबंधद्वयमेव धूमत्वे इत्यालोकत्वापवेच्छिन्नप्रकारताशालिपरामर्शादनुमितिनिरा
बाधैव तादृशज्ञानदशायामालोकत्वावच्छिन्नप्रकारतायां ज्ञानाभावस्याक्षतत्वात्। आलोका

नव्य०
५
5

भाववद्वह्निधूमप्रकारकं धूमाभाववति आलोकप्रकारकंमितितानानन्तरमनुमित्सुपपन्नेप्रकारतावच्छायांसंबं
धद्वयानुधावनं·नचैवंपुरुषांतराणांप्रामाण्यग्रहकालेप्यनुमितिनस्यात्व्याप्यप्रकारतायांज्ञानाभावस्य
तदानीमसत्वात।समानप्रकारकज्ञानानांप्रकारताभेदाभावेनतादृशधर्मावच्छिन्नत्वस्यसमानाधि
करणाज्ञाननिरूपितत्वोभयसंबंधावच्छिन्नाभावोक्तावपिननिस्तारइतिवाच्यं।तत्पुरुषीयानुमिति
जनकतावच्छेदककोटौतदीयज्ञानाभावस्यनिवेशनीयत्वादितिपुरुषभेदेनकार्यकारणभावभेदे
पिलिंगभेदेनतद्भेदविरहाल्लाघवमव्याहतंपुरुषेभ्यालिंगानामाधिक्यादित्याहुः।तदसत्घटज्ञा
नादावतीतपरामर्शस्यैवाप्रामाण्यधीकालेअनुमित्यनुदयापत्तेविद्यमानपरामर्शीयप्रकारताया
मपितदानीमुक्तज्ञानाभावासत्वात्अतीतादिविद्यमानयोःसमानाकारज्ञानयोःप्रकारतैक्यात्तउक्त
संबंधद्वयेनस्वविशिष्टायायाधर्मस्तदवच्छिन्नत्वस्वनिरूपितविशेष्यताश्रयज्ञाननिरूपितत्वोभय एम०
संबंधावच्छिन्नप्रतियोगिताकाभावोक्तावपिअनुपपत्तेरनुद्धारादिति।अत्रब्रूमःपक्षेविशेष्यता ५

निरूपितप्रकारतावत्त्वानत्वेन हेतुत्वं प्रकारतावसंचव्याप्यत्वधर्म्मितावच्छेदकतापन्नः त्वावच्छेदकीया
धर्मस्त्वद्विशिष्टप्रकारतानिरूपितविशेष्यत्वसामानाधिकरण्योभयसंबंधावच्छिन्नप्रतियोगिताकज्ञा
नाभाववत्त्वस्वनिरूपकत्वोभयसंबंधावच्छिन्नधूमवैशिष्ट्यं च प्रकारतायां स्वावच्छिन्नाभाववद्वह्नि
विशेष्यतानिरूपितत्वावच्छिन्नत्वास्वावच्छिन्नप्रकारतात्वावच्छिन्नत्वोभयसंबंधावच्छिन्नमुपाद
यं। ज्ञानान्तरविशिष्टकधूमाभाववद्वह्निशेष्यतानिरूपितधूमत्वास्वावच्छिन्नप्रकारतात्वावच्छिन्नत्वो
भयसंबंधावच्छिन्नमुपादेयं। ज्ञानान्तरविशिष्टकधूमाभाववद्वह्निशेष्यतानिरूपितधूमत्वावच्छिन्नप्र
कारतात्वावच्छिन्नत्वोभयसंबंधावच्छिन्नमुपादेयं। ज्ञानाग्रहदशायां स्वविशिष्टकालोकाभाववद्वह्नि
शेष्यतानिरूपितालोकत्वावच्छिन्नप्रयकारताग्रहदशायां स्वविशिष्टकालोकाभाववद्वह्निशेष्यतानि
रूपितालोकत्वावच्छिन्नप्रकारताग्रहदशायां विद्यमानधूमपरामर्शोऽस्तु प्रकारत्वापत्ता दृशावच्छेद

नव्य० ६
6

कधूमत्वविशिष्टप्रकारतानिरूपितविषयतासंबंधावच्छिन्नत्तानाभावसत्वात्तत्प्रकारतामेवाभिदि
तप्रकारतावत्त्वमिति न काचिदनुपपत्तिः स्वावच्छिन्नाभावविशेष्यतानिरूपितत्वावच्छिन्नत्वादि
कं च स्वनिष्ठावच्छेदकतासादिकमेवास्वरूपशो निर्वाच्या स्वनिष्ठावच्छेदकता च स्वनिरूपकावच्छे
दकतानिरूपितत्वसंबंधेन धे व्याप्यतानिष्ठावच्छेदकतान्यावच्छेदकताविशिष्टान्याश्रयास्यात्तेन ना
लधूमाभाववति धूमप्रकारकत्वग्रहे वन्हिव्याप्यधूमवानिति परामर्शान्नानुमित्यनुपपत्तिः नचा
वन्हिव्याप्यधूमाभाववति धूमप्रकारकमितादिग्रहे तस्मादनुमित्यापत्तिः अथैवमपि नैकरूपेणा
धूमालोकादिलिंगकपरामर्शानामनुमितिहेतुत्वं संभवति तथा सति वन्हिव्याप्यधूमवान्पर्वतो व
न्हिमानिति परामर्शकाले धूमेनानुमिनुयामितीच्छाकाले यथा अनुमितिः तथा वन्हिव्याप्याला
कवान्पर्वतो वन्हिमानिति सिद्धिकाले धूमलिंगकेच्छासत्वे आलोकपरामर्शादपि स्यात धूम श्री० ६

परामर्शवत्तदानीमपि धूमलिंगकानुमित्साविरहविशिष्टसिद्ध्यभावादिसहितव्याप्यवत्तानिर्णयात्म
कसामग्र्यासत्त्वादितिचेत्स्यादेतत्तत्तल्लिंगविशेषनिरूपितापक्षताभवेत्। नचैवंव्याप्तिधर्म्मितावच्छेद
कतापन्नधर्म्मिविशेष्यतानिरूपितस्वप्रकारतावच्छेदकधर्म्मावच्छिन्नलिंगकत्वप्रकारतानिरू
पितानुमितिनिष्ठविशेष्यताकत्वसंबंधेनपरामर्शविशिष्टेच्छात्वेनतत्तल्लिंगकपरामर्शकालीन
तत्तल्लिंगकानुमित्साअनुगमय्यतदभाववविशिष्टसिद्ध्यभावस्यैवपक्षतात्वोपगमादालोकपरा
मर्शकपरामर्शकालीनधूमलिंगकानुमित्सायांचतादृशपरामर्शवैशिष्ट्यविरहेणपक्षत्वानवका
शादिति। अत्रवदंतिपक्षैकरूपेणधूमालोकादिपरामर्शानांकारणत्वेबाधकोनकाशतदाव्या
पकसामानाधिकरण्यस्यव्याप्तित्वेपिनेयांतथाकारणतासंभवतिस्वविशिष्टव्यापकसामा
नाधिकरण्यधर्म्मितावच्छेदकतापन्नत्वावच्छिन्नत्वसंबंधेनावच्छेदकविशिष्टतत्साध्यविशेष्य

नव्य० ७ 7

तानिरूपितहेतुप्रकारतानुगमेधूमव्यापकवन्हिसमानाधिकरणेंधनवानितिज्ञानानामनुमिति
नकतानाधूमव्यापकवन्हिसमानाधिकरणधूमवानित्यादिज्ञानप्रकारतानामेवोक्तसंबंधेना
वछेदकविशिष्टत्वानानन्चैतत्स- कारणतावछेदकगौरवपरीहाराऽसंभवेनाभिहितपक्षए
वसाधीयानितिवाच्यंदर्शितसामग्र्याप्रतिबंधकत्वाकल्पनेनरहौरवाकिंचि- रत्वस्यप्रागेवो
क्तत्वादितिनिरावाधेवकेवलान्वयित्वेनज्ञायमानस्यापिसाध्यस्यानुमितिः। अथैतन्मतस्वरू
पतावन्हित्वविधेयतावछेदककानुमितेरनुपपत्तिःधूमसमानाधिकरणाभावप्रतियोगितान
वछेदकवन्हित्वत्वावछिन्नसमानाधिकरणधूमवा नयमित्यादिपरामर्शेवन्हित्वत्वादिने
वतेषांभानातवन्हित्वात्वानवगाहिपरामर्शेणचव्यभिचारज्ञानाप्रतिवध्यतया अनुमितिका
रणत्वासंभवात॥ नचपरामर्शेवन्हित्वस्यस्वरूपेणाविषयत्वेपि अनुमितेस्तथाविषयत्वे श्री० ७

नबाधकंतथाविषयतायाएवञ्चपरामर्शजन्यतावच्छेदकत्वोपगमादितिवाच्यंवन्हित्ववत्त्वा
न्नित्याकारकानुमितिविलयापातात्तथाविधानुमितावपितादृशमर्शस्यहेतुत्वोपगमेतुव
ह्न्यनुमितेःवन्हिमान्वह्नित्ववद्वानित्याकारतापत्तेरितिचेन्नैवंवन्हिधित्याकारतापत्तेःसमानाधि
करणधूमवानित्याकारकस्यसामानाधिकरण्यनिरूपकतावच्छेदकतयास्वरूपपतोवन्हित्वावगा
हिनएवपरामर्शस्यवह्निमानित्यनुमितिहेतुत्वसंभवात्।नचवन्हित्ववत्त्वानित्याकारकानुमितिका
रणतावच्छेदकधर्मस्यापितादृशपरामर्शसाधारणतयाततस्तथाविधानुमितिरपिदुर्वारैवेतिवाच्यं
स्वरूपेणावन्हित्वानवगाहित्वस्यापितादृशानुमितिकारणतावच्छेदककोटौनिवेशनीयत्वात्तअ
थवानिरवच्छिन्नवन्हित्वघटितवह्नीतरावृत्तित्वरूपवन्हित्वत्वावगाहापरामर्शोवन्हिमानित्य
नुमितौवह्नित्ववत्त्वानित्यनुमितौतुवन्हित्ववदितरावृत्तित्वावगाहासदितिवाच्यंयदिस्वनोव्या

नव्य०
८
४

वृत्तनयाविशेषणं स्वरूपतेलिंगतातथाविशेष्यतापिवह्नित्वादेः स्वरूपेणतद्वाहेतुसमानाधिक
रणाभावप्रतियोगितानवच्छेदकत्वांशेनिर्धर्म्मितावच्छेदकस्यैववह्नित्वनिष्ठतादृशविशेष्यताशान्हि
परामर्शस्यवन्हिमानित्यनुमितित्वेनुत्वमुपगंतव्यं।तथाविधविशेष्यताकतादृशप्रतियोगितावच्छे
दकत्वग्रहात्मकस्यैवव्यभिचारग्रहस्यतादृशपरामर्शप्रतिबंधतायायुक्तत्वात्।वस्तुतस्तुस्वावच्छि
न्नत्वसंयोगादिसंबंधावच्छिन्नत्वोभयाभाववद्धेतुसमानाधिकरणाभावप्रतियोगितासामान्यकव
न्हित्वावच्छिन्नसमानाधिकरणधूमत्वादिरूपेवव्याप्तिर्निर्वक्तव्या।तत्रचस्वपदार्थस्यवन्हित्वाद
र्यथाप्रवेशस्तथैवानुमितिविषयतव्यभिचारज्ञानमपितादृशप्रतियोगिताधर्म्मिकाननुभयत्रा
ज्ञानमितिनानुपपत्तिर्लेशोपीतिविभाव्यतेइति॥ ॥ ॥ ॥ ७ ॥ ॥ ॥

श्री०
८